# पञ्चम उल्लासः

(**क**) **गुणीभूतव्यङ्ग्यस्य अष्टौ भेदाः**-

1. गुणीभूतव्यङ्ग्ये व्यङ्ग्यं कतिविधम् ?
   अष्टविधम्- अगूढम्, अपरस्य अङ्गम्, वाच्यसिद्ध्यङ्गम्, अस्फुटम्, संदिग्धप्राधान्यम्, तुल्यप्राधान्यम्, काक्वाक्षिप्तम्, असुन्दरं च।
2. अगूढं व्यङ्ग्यं निरूपयत।

यद् व्यङ्ग्यम् अतिस्पष्टं वाच्येन तुल्यं भवति तद् अगूढं भवति। यथा- **यस्याऽ सुहृद्** इत्यादौ पद्ये- **जीवन्न संप्रति भवामि किमावहामि**। अत्र वृहन्नलारूपस्य अर्जुनस्योक्तौ जीवन्नेति कथनेन प्रशस्तस्य जीवनस्य अभावो लक्षणया बोध्यते, तादृशे अर्जुने अनुतापस्य अतिशयो व्यङ्ग्यो वर्तते। स सर्वैरेव झटिति ज्ञातो भवति। अनुतापरूपं व्यङ्ग्यम् अगूढं वर्तते। एवं **उन्निद्रकोकनद**.... इत्यादिपद्ये- **उदयाचलचुम्बिबिम्बम्**। अत्र चुम्बिपदेन व्यङ्ग्यः प्रातः कालः अगूढो वर्तते। एवमेव **अत्रासीत् फणिपाशबन्धनविधि**रित्यादौ पद्ये **केनापी**ति पदेन रामरूपो व्यङ्ग्यः शीघ्रं सर्वैरेव ज्ञातो भवति। अत एतादृशं सर्वैरेव यद् व्यङ्ग्यं झटिति प्रतीयते तद् अगूढं कथ्यते।

3. गूढाद् अगूढस्य व्यङ्ग्यस्य को भेदः?

गूढं कामिनीकुचकलशवत् चमत्कारि भवति, अगूढं तु अतिस्फुटं वाच्यतुल्यम्, तथा चमत्कारि न भवति।

4. अपरस्य अङ्गं व्यङ्ग्यं निरूपयत।

यद् रसादिरूपं संलक्ष्यक्रमं वा व्यङ्ग्यम् अपरस्य (अन्यस्य रसादेः, प्रधानस्य वाच्यस्य वा) अङ्गम् (उपकारकं) भवति तद् अपरस्य अङ्गम् अपराङ्गं वा कथ्यते। यथा-

**अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।**
**नाभ्यूरुजघनस्पर्शी नीविविस्रंसनः करः।**

इदं पद्यं महाभारते स्त्रीपर्वणि वर्तते। भूरिश्रवसः पत्नी स्वपत्युः छिन्नं मस्तकं विलोक्य विलपति- अयं स एव करो वर्तते यो मम नाभिम्, ऊरू, जघनं (नितम्बं) च स्पृशति स्म, मम पीनौ (पुष्टौ) स्तनौ मर्दयति स्म, कटिवस्त्रस्य बन्धनं शिथिलयति स्म च। अत्र शृङ्गारः (रतिः) प्रधानस्य करुणस्य अङ्गं वर्तते। **कैलासालये**त्यादौ पद्ये शिवविषयस्य भावस्य शृङ्गारः अङ्गं विद्यते, **अत्युच्चाः परित** इत्यादौ पद्ये भूविषयो रतिभावो राजविषयस्य रतिभावस्य अङ्गं विद्यते, **वन्दीकृत्य** इत्यादौ पद्ये राजविषयस्य रतिभावस्य रसाभासो भावाभासश्च अङ्गे स्तः, **अविरलकरवालकम्पनैः** इत्यादौ पद्ये

राजविषयकरतिभावस्य अङ्गं भावशान्तिः अस्ति, साकं **कुरङ्गकदृशे**त्यादौ पद्ये राजविषयकरितभावस्य अङ्गं त्रासरूपस्य भावस्य उदयोऽस्ति, **पश्येत् कश्चि**दित्यादौ पद्ये राजविषयकरतेः अङ्गं शङ्कायाः, असूयायाः, धृतेः, स्मृतेः, श्रमस्य, दैन्यस्य, विबोधस्य, औत्सुक्यस्य च शबलता (भावशबलता) वर्तते।

5. रसवदादयः अलंकाराः कुत्र अन्तर्भवन्ति?
6. किं तत् काव्यं संभवति, यत्र ध्वनि-गुणीभूतव्यङ्ग्ययोः संकरः संसृष्टिर्वा न भवति?
7. वाच्यसिद्ध्यङ्गं निरूपयत।

यद् व्यङ्ग्यं विना अन्येन केनापि प्रकारेण वाच्यस्य सिद्धिर्न भवति तद् वाच्यस्य साधकं व्यङ्ग्यं वाच्यसिद्ध्यङ्गं कथ्यते। यथा- **भ्रमिमरति**मित्यादौ पद्ये विषम् इतिपदेन व्यङ्ग्यं जलं जलदे भुजगारोपरूपस्य वाच्यस्य रूपकस्य साधकम् अस्ति, **गच्छाम्यच्युते**त्यादौ पद्ये अच्युतादिपदैः कृष्णे धैर्यच्युतेः अभावादिरूपं व्यङ्ग्यम् उत्तरार्धेन प्रतिपादितस्य वाच्यस्य साधकं वर्तते। अतो जलादिरूपं व्यङ्ग्यं वाच्यस्य साधकत्वेन वाच्यसिद्ध्यङ्गं वर्तते।

8. अस्फुटं व्यङ्ग्यं निरूपयत।

यद् व्यङ्ग्यम् अतिगूढं भवति, क्लिष्टकल्पनया प्रतीयते, स्वज्ञाने सहृदयं क्लेशयति तद् अस्फुटं कथ्यते। यथा- **अदृष्टे दर्शनोत्कण्ठे**त्यादौ पद्ये 'त्वं सदा दृष्टो भव, वियोगभयं न भवतु च' इति व्यङ्ग्यं क्लिष्टकल्पनया ज्ञायते। अतोऽस्फुटं वर्तते। इदम् अतिगूढं विद्यते। व्यङ्ग्यं त्रिधा भवति- अतिगूढम्, गूढम्, अगूढं च। तत्र गूढस्य स्थलं ध्वनि-नामकम् उत्तमं काव्यं भवति, यत्र तु अतिगूढम् अगूढं वा व्यङ्ग्यं भवति तत्र गूणीभूतव्यङ्ग्यनामकम् मध्यमं काव्यं भवति।

9. संदिग्धप्राधान्यं निरूपयत।

यस्य व्यङ्ग्यस्य वाच्यात् प्राधान्यं संदिग्धं (संदेहस्य विषयो) भवति तत् संदिग्धप्राधन्यं कथ्यते। यथा- **हरस्तु किञ्चित्परिलुप्तधैर्य** इत्यादौ कुमारसंभवस्य पद्ये हरेण उमाया बिम्बफलसदृशे मुखे स्वनेत्राणां व्यापारणं (नेत्रयेण दर्शनं) वाच्यं प्रधानं वर्तते, तेन प्रतीयमानं चुम्बनेच्छारूपं व्यङ्ग्यं वा प्रधानं वर्तते इति संदेहो भवति। वाच्यस्य व्यङ्ग्यस्य वा प्राधान्ये किमपि साधकं प्रमाणम् इह नास्ति। वाच्यम् अपि लोकोत्तरं चमत्कारि वर्तते, व्यङ्ग्यम् अपि च।

10. तुल्यप्राधान्यम्

यत्र व्यङ्ग्यस्य प्राधान्यं वाच्येन तुल्यम् एव भवति तत् तुल्यप्राधान्यं कथ्यते। यथा- **ब्राह्मणातिक्रमत्याग** इत्यादौ रावणं प्रति परशुरामस्य वाक्ये पद्ये यदि 'त्वं ब्राह्मणानाम् अनादरं करिष्यसि तदा परशुरामः क्षत्रियाणाम् इव तवापि क्षयं करिष्यति' इति व्यङ्ग्यं प्रधानं वर्तते, अथवा 'यदा त्वम् ब्राह्मणानाम् आदरं करिष्यसि तदा कुलसहितस्य तव कल्याणं भविष्यति, मया मित्रता च

स्थास्यति' इति वाच्यं वा प्रधानं वर्तते- इति संदेहो भवति। वाच्यं सामरूपं विद्यते, व्यङ्ग्यं तु दण्डरूपम्। राजनीतौ साम-दण्डयोः यथाकालं तुल्यमेव प्राधान्यं भवति।

11. काक्वाक्षिप्तं व्यङ्ग्यं निरूपयत।

काकुः विकृतः कण्ठस्वरः कथ्यते- **भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते**। काक्वा आक्षिप्तं (बोधितं) व्यङ्ग्यं काक्वाक्षिप्तं कथ्यते। यथा- **मथ्नामि कौरवशतं समरे न कोपात्**.... इत्यादौ वेणीसंहारस्य पद्ये भीमसेनस्य कथने काक्वा 'कौरवशतं मथ्नामि एव' इति व्यङ्ग्यं प्रकाश्यते। इदम् इह वाच्यात् प्रधानं नास्ति, अतो गुणीभूतं वर्तते।

12.असुन्दरं व्यङ्ग्यं प्रतिपादयत।

यद् व्यङ्ग्यं वाच्यापेक्षया सुन्दरं न भवति तद् असुन्दरं कथ्यते। यथा- **वाणीरकुञ्जोड्डीन**....इत्यादौ पद्ये वध्वा

अङ्गेषु अवसादो वाच्योऽस्ति, 'यस्मै संकेतो दत्तः स नायको लतावने प्रविष्टः' इति व्यङ्ग्यं वर्तते। अस्माद् व्यङ्ग्याद् उक्तो वाच्यार्थ एव सुन्दरं वर्तते, यतोऽयं विप्रलम्भस्य अनुभावो वर्तते, अतो विप्रलम्भं व्यनक्ति। किन्तु तद् व्यङ्ग्यं केवलं वस्तुरूपं वर्तते, अतो वाच्याद् असुन्दरम् अस्ति।

13. 'एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत्' इत्यस्य कथनस्य कोऽभिप्रायः?

अत्र प्रतिपाद्यते यद् एषां गुणीभूतव्यङ्ग्यानां भेदाः पूर्ववद् ( ध्वनिवद् एव) ज्ञातव्याः। **यथायोगम्** इति कथनस्याऽऽशयो विद्यते यद् वस्तुमात्रेण व्यञ्जकेन व्यङ्ग्या अलंकाराः कदाचिद् अपि गुणीभूतव्यङ्ग्या न भवन्ति, यतोऽलंकाराणाम् एव व्यक्तये कविः काव्ये प्रवर्तते, ते अलंकाराः सदा ध्वनिरूपा एव भवन्ति, इमे एव तत्र काव्यपदप्रवृत्तेः निमित्तानि भवन्ति। एवं गुणीभूतव्यङ्ग्यस्य अष्टौ एव भेदा न भवन्ति, अपितु ध्वनिवद् अर्थान्तरसंक्रमितवाच्यादयोऽपि भेदा भवन्ति।

14. 'काव्यवृत्तेस्तदाश्रयात्' अस्यार्थः कः?

15. 'सालंकारैर्ध्वनेस्तैश्च' अत्र सालंकारैरिति पदस्य द्वौ अर्थौ कौ ?

**(ख) व्यञ्जनायाः स्थापनम्**

1. संकलनेन ध्वनेः कति के च भेदाः?
2. कोऽर्थः स्वप्नेऽपि न वाच्यः?
3. विभावादिना कस्य अन्वयव्यतिरेकौ स्तः?
4. रसः कथं न लक्ष्यः?
5. अर्थान्तरसंक्रमितवाच्ये लक्षणा किं विना न भवति?

**अभिहितान्वयवादे अभिधायां व्यञ्जनाया न अन्तर्भावः**

ये अभिहितानाम् (अभिधया बोधितानां) पदार्थानाम् अन्वयं वदन्ति तेषां भट्टमतानुयायिनां मतम् अभिहितान्वयवाद उच्यते। अत्र गोत्वादौ जातवेव संकेतः स्वीक्रियते। अभिधया बोधितानां पदार्थानाम् आकाङ्क्षया योग्यतया सन्निधिना च अन्वयः वाक्यार्थः संपद्यते, योऽ पदार्थः (एकस्य पदस्यार्थः) न भवति, अपितु पदसमूहस्य अर्थो भवति, तात्पर्यार्थः कथ्यते च। एवम् अत्र मते अभिधाया विषयः सामान्यरूप एव अर्थो भवति, वाक्यार्थोऽ भिधाया विषयो न भवति। ततो वाक्यार्थाद् अनन्तरं ज्ञायमानो व्यङ्ग्यार्थः अभिधाया विषयः (वाच्यः) कथम् अपि न भविष्यति। अतोऽ त्रापि मते व्यङ्ग्यबोधाय व्यञ्जना स्वीकार्या एव। व्यञ्जनाया अन्तर्भावः संकेतितस्य एव अर्थस्य बोधिकायाम् अभिधायां न संभवति।

1. अर्थशक्तिमूले विशेषे संकेतः कथं न कर्तुं शक्यते?

विशेषे (व्यक्तौ) संकेतो न मन्यते। विशेषा गवादयो व्यक्तयः अनन्ता भवन्ति। संकेतग्रहस्य समये स्थाने च सर्वा व्यक्तय उपस्थिता न भवन्ति। गवादिशब्दात् तासाम् अपि गवादिव्यक्तीनां ज्ञानं भवति यत्र संकेतो न भवति। यत्र संकेतो न भवति तस्या अपि गवादिव्यक्तेः ज्ञाने स्वीकृते संकेतग्रह-अर्थबोधयोः कल्पिते कार्यकारणभावे व्यतिरेकव्यभिचारेण स कार्यकारणभावो विघटितो भवति। विशेषेषु संकेते कथंचित् स्वीकृतेऽ पि एकस्यैव गवादिशब्दस्य अनन्तासु व्यक्तिषु अनन्तानां शक्तीनां कल्पने गौरवं भवति। एवम् आनन्त्याद् व्यभिचाराच्च विशेषे संकेतः कर्तुं न शक्यते। अतः सामान्ये (जातौ) गोत्वादौ एव संकेतः स्वीक्रियते।

2. आकाङ्क्षा का ?
3. योग्यता का ?
4. सन्निधिः कः?

**अन्विताभिधानवादे अभिधायां व्यञ्जनाया न अन्तर्भावः**

1. 'शब्दवृद्धाभिधेयांश्च........संबन्धं त्रिप्रमाणकम्। ' अनयोः कारिकयोः अभिप्रायं लिखत।

आभ्यां कारिकाभ्याम् अन्विताभिधानवादस्य मतं प्रतिपाद्यते। ये अन्वितस्य अर्थस्य अभिधानम् (अभिधया बोधनं) स्वकुर्वन्ति तेषा गुरुमतानुयायिनां मतम् अन्विताभिधानवादः कथ्यते। संकेतग्रहः सर्वप्रथमं व्यवहारेण भवति। कश्चन बाल उत्तमवृद्धस्य (स्वपितामहस्य) 'गाम् आनय' इति अखण्डं वाक्यं शृणोति, ततो मध्यमवृद्धेन (स्वपित्रा) गोरानयनं पश्यति च। ततः स मध्यमवृद्धस्य गवानयचेष्टया अनुमानेन प्रमाणेन मध्यमवृद्धस्य गामानयेति-वाक्यार्थस्य ज्ञानम् अनुमिनोति, ततोऽ र्थापत्तिप्रमाणेन स बालो गामानयेति-वाक्यस्य गवानयनरूपस्य वाक्यार्थस्य च वाच्यवाचकभावरूपं संबन्धं निश्चिनोति, यतः संबन्धं विना तद् वाक्यं तं वाक्यार्थं बोधयितुं न शक्नोति। एवं बालो व्यवहारेण

वाच्यवाचकभावरूपाया अभिधाया ज्ञाने प्रत्यक्षस्य, अनुमानस्य, अर्थापत्तेश्च प्रमाणस्य उपयोगं करोति। बालः प्रत्यक्षेण उत्तम-मध्यमौ वृद्धौ गवानयनं च जानाति, अनुमानेन मध्यमवृद्धे गवानयनस्य ज्ञानं वेत्ति, अर्थापत्त्या वाक्य-वाक्यार्थयोः वाच्यवाचकभावं सम्बन्धम् अवगच्छति। एवं वाच्यवाचकभावस्य ज्ञाने त्रयाणां प्रमाणानाम् उपयोगो भवति। बालो यदा 'अश्वम् आनय, गां बधान' - इत्यादीनि नाना वाक्यानि शृणोति तदा अन्वयेन व्यतिरेकेण च गोशब्दस्य क्रियान्विते गवि, आनयशब्दस्य च गवाद्यन्विते आनयने अभिधां निर्णयति। एवं पदार्थोऽत्र सामान्येन अन्वितो विशेषरूपो भवति। किन्तु वाक्यार्थः अतिविशेषरूपो भवति। यथा गवानयनम् अतिविशेषो वर्तते, यतोऽन्वयिनी गवानयने विशेषौ स्तः। पदार्थे तु एकम् अन्वयि सामान्यम्, अपरं तु विशेषो भवति। इत्थम् अत्रापि मते वाक्यार्थोऽभिधाया विषयो (वाच्यो) न भवति, अतो वाक्यार्थात् परं यद् व्यङ्ग्यं ज्ञायते सोऽभिधाया वाच्यः कथं भवेत् ? एवम् अन्विताभिधानवादेऽपि व्यञ्जना अभिधायां नान्तर्भवति।

2. अभिहितान्वये अन्विताभिधाने च वाक्यार्थः कथं न वाच्यः?

3. 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' अस्य कथनस्य कोऽभिप्रायः?

अनेन मीमांसैकदेशिनां कथनेन प्रतिपाद्यते यद् नैमित्तिकस्य (कार्यस्य) अनुसारेण निमित्तस्य (कारणस्य) कल्पना भवति। अनेन नियमेन वक्तुं शक्यते यद् व्यङग्यस्य प्रतीतिरूपं कार्यं शब्दरूपेण ज्ञापकेन निमित्तेन भवति। नशब्दस्य प्रयोगो यदा विधिज्ञानाय कविना क्रियते तदा नशब्दः 'तस्य अधमस्य अन्तिकं न गताऽसि' इति गमनविधिरूपं व्यङग्यम् अभिधयैव प्रतिपदयति। अतो व्यङग्यस्य ज्ञानाय व्यञ्जना न स्वीकार्या। किन्तु काव्यप्रकाशकारः कथयति यद् इदं कथनं युक्तं नास्ति। निमित्तं द्विधा भवति- कारकं ज्ञापकं च। तत्र शब्दो ज्ञापकमेव भवति, न तु कारकम्, न हि गुडशब्दस्य कथनेन गुडस्य उत्पत्तिर्भवति, अपितु गुडशब्दो गुडरूपम् अर्थं ज्ञापयति। शब्दो व्यापारं विना अर्थं ज्ञापयितुं न शक्नोति। सोऽभिधया संकेतितमेव अर्थं ज्ञापयति। नशब्दस्य निषेधरूपोऽर्थः संकेतितोऽस्ति, विधिरूपः संकेतितो नास्ति। अतः कञ्चन व्यापारं विना स विधिरूपम् अर्थं बोधयितुं न शक्नोति। विधिरूपस्यार्थस्य बोधनाय नशब्दे कश्चन व्यापारः कल्पनीयः। स व्यञ्जनैव भवितुम् अर्हति।

4. 'सोऽयम् इषोरिव दीर्घदीर्घतरो व्यापारः' अस्य कथनस्य कोऽभिप्रायः?

भट्टलोल्लटादीनां मतं वर्तते यद् यथा कुशलेन धनुर्धरेण प्रयुक्तो बाण एकेनैव वेगव्यापारेण शत्रोः कवचं भिनत्ति, हृदयं छिनत्ति प्राणान् हरति च तथा शब्द एकेनैव अभिधाव्यापारेण वाच्यं व्यङ्ग्यं चार्थं बोधयति, व्यङ्ग्यबोधाय व्यञ्जना व्यापारो न कल्पनीयः। किन्तु मम्मटो मतमिदं खण्डयन्निदं कथयति- 'ब्राह्मण पुत्रस्ते जातः' इत्यत्र मुखस्य प्रसादेन ब्राह्मणे हर्षः, 'ब्राह्मण कन्या ते गर्भिणी'

इत्यत्र ब्राह्मणस्य मुखमालिन्येन ब्राह्मणे दुःखम् अनुमेयं मन्यते। यदीदं दीर्घदीर्घया अभिधयैव बोध्येत तदा हर्षस्य दुःखस्य च वाच्यता एव स्यात्, न तु सिद्धान्तरूपेण स्वीकृता अनुमेयता। एवं लक्षणाया अपि स्वीकारो व्यर्थो भवेत्। किञ्च ये दीर्घदीर्घाम् अभिधां स्वीकुर्वन्ति ते मीमांसकाः सन्त आलंकारिका हर्षादीनाम् अनुमेयतां लक्षणां च स्वीकुर्वन्ति। किञ्च यदा तथाविधया अभिधयैव युगपत् सर्वेषाम् अर्थानां बोधो भवेत् तदा अर्थानां ज्ञाने विप्रकर्षो (विलम्बो) न भवेत्, ततश्च श्रुति-लिङ्गादीनां मध्ये उत्तरोत्तरस्य दौर्बल्यं यज्जैमिनिना प्रतिपादितं तद् विरुद्धं स्यात्। दौर्बल्यस्य कारणं हि अर्थविप्रकर्षः ( अर्थज्ञानस्य विलम्बः) कथितः। अतोऽभिधायां दीर्घदीर्घत्वं बाणदृष्टान्तेन साधयितुं न शक्यते।

5. 'यत्परः शब्दः स शब्दार्थः' अस्य कथनस्य क आशयः?

यस्य अर्थस्य बोधनाय शब्दः प्रयुज्यते स एव तस्य शब्दस्य अर्थः तात्पर्यविषयो वाच्यो भवति। दशरूपकस्य टीकाकारो धनिकोऽपि इमम् एव सिद्धान्तं स्वीकृत्य व्यञ्जनां तात्पर्ये अन्तर्भावितवान्। यदि नशब्दस्य प्रयोगो विधेर्बोधनाय क्रियते तदा तात्पर्यविषयो विधिरूपः अर्थो वाच्य एव भवति। अतो **निःशेषच्युतचन्दनम्** इत्यादौ पद्ये विधेर्बोधनाय नशब्दे व्यञ्जना न स्वीकार्या।

किन्तु मम्मटो 'यत्परः शब्दः स शब्दार्थः' इति मीमांसासिद्धान्तस्य अभिप्रायं प्रकटयन् कथयति यद् वाक्ये किञ्चित् पदं ज्ञातस्य अर्थस्य, किञ्चित् तु अज्ञातस्य (अन्येन प्रमाणेन अबोधितस्य) बोधकं भवति। यथा- 'गाम् आनय' इत्यत्र गोपदं ज्ञातस्य (सिद्धस्य) गोपदार्थस्य बोधकं वर्तते, आनयेति पदं तु अज्ञातस्य आनयनस्य। आनयनं गोर्गमनं विना न संभवति। सिद्धोऽपि गोपदार्थः प्रधानस्य आनयनस्य साधकं यद् गमनं भवति तस्य संबन्धेन साध्यवत् प्रतीयते। 'गाम् आनय' इति वाक्यस्य तात्पर्यं गवि नास्ति, अपितु आनयने वर्तते। अत आनयनम् एव उक्तस्य वाक्यस्य तात्पर्यार्थो वर्तते। स च आनयेतिपदस्य वाच्योऽर्थो विद्यते। एवम् उक्तस्य मीमांसा-वचनस्य अर्थो भवति यद् वाक्ये केचन पदार्था ज्ञाताः (सिद्धाः), कश्चन,कौचन, केचन वा अज्ञाताः (सिद्धा) भवन्ति, तत्राऽज्ञाते (साध्ये) एव शब्दस्य वाच्ये एव च अर्थे वाक्यस्य तात्पर्यं भवति। निःशेषेत्यादौ पद्ये नशब्दो यद्यपि विधेरेव बोधनार्थं कविना प्रयुक्तः, तथापि विधिर्नशब्दस्य वाच्यो नास्ति, अत एष '**यत्पर**' इति मीमांसासिद्धान्तस्य विषयो नास्ति। अतो **निःशेष** इत्यादौ पद्ये नशब्देन निषेधरूपस्यार्थस्य बोधाय नशब्दे व्यञ्जना स्वीकार्या।

6. 'भूतभव्यसुच्चारणे भूतं भव्यायोपदिश्यते' अस्य क आशयः?

भूतस्य (सिद्धस्य) भव्यस्य (साध्यस्य) च वाक्येन समुच्चारणे (पदोच्चारणेन बोधने) सति भूतं (सिद्धं) भव्याय (साध्यस्य साधनाय) उपदिश्यते (बोध्यते)। यथा- 'गाम् आनय' इत्यत्र सिद्धो गोपदार्थः साध्यम् आनयनं साधयितुम् उक्तः। गोपदार्थं विना हि आनयनं न संभवति।

7. 'अदग्धदहनन्यायः' इत्यस्य कोऽभिप्रायः?

यथा अग्नेः प्रयोगः अदग्धस्यैव काष्ठस्य दहनाय भवति, न तु दग्धस्य काष्ठस्य दहनाय, तथा वाक्यस्यापि प्रयोगः अज्ञातस्यैव अर्थस्य बोधनाय भवति, न तु ज्ञातस्य अर्थस्य बोधनाय। अज्ञाते वाच्ये एवार्थे तात्पर्यं भवति।

8. 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' अत्र विधेयं किम्?
9. 'दध्ना जुहोति' अत्र विधेयं किम्?
10. 'रक्तं पटं वय' अत्र कथम् एकविधिः, द्विविधिः, त्रिविधिश्च?
11. 'विषं भक्षय मा चास्य गृहे भुक्थाः' अस्य कोऽभिप्रायः?

मम्मटेन उक्तं यत् सर्वत्र शब्देनैव बोधितेऽर्थे वाक्यस्य तात्पर्यं भवति। तदा प्रश्नो भवति यद् 'अस्य गृहे न भोक्तव्यम्' इति उक्तस्य वाक्यस्य तात्पर्यं कथं स्यात्? यतो हि उक्ते वाक्ये उक्तस्य तात्पर्यभूतस्य अर्थस्य बोधकः कश्चिद् अपि शब्दो नास्ति। अस्य प्रश्नस्य उत्तरम् इदं भवति यद् 'विषं भक्षय मा चास्य गृहे भुक्थाः' इति वाक्यं मात्रा तं पुत्रं प्रति उक्तम्, यो निषिद्धोऽपि कस्यचिद् गृहे भोक्तुं गच्छति। माता तं पुत्रं वदति यत् त्वं विषं खाद, किन्तु तस्य मम शत्रोर्गृहे न खाद। माता स्वपुत्रं विषभक्षणाय न वक्तुम् अर्हति। अतो विषभक्षणरूपस्य वाक्यार्थस्य एतद्गृहभोजनाभावे वाक्यार्थे अङ्गता चशब्दस्य बलेन कल्प्यते। अतश्चशब्दस्य बलेन वाक्यरूपशब्देन बोधिते एव अस्य गृहे भोजनाभावे वाक्यस्य तात्पर्यं वर्तते। एवं सर्वत्र शब्देन बोधिते एवार्थे वाक्यस्य तात्पर्यं भवति।

12. वाच्य-व्यङ्ग्ययोः भेदं यथाग्रन्थं प्रतिपादयत।

वाच्यस्य स्वरूपं व्यङ्ग्यस्य स्वरूपं सर्वथा भिन्नं भवति। वाच्यं यदा निषेध-निन्दा-संशयादिरूपं भवति, तदा व्यङ्ग्यं विधि-प्रशंसा-निर्णयादिरूपं भवति। वाच्यं सर्वान् बोद्धॄन् प्रति एकरूपमेव भवति, व्यङ्ग्यं तु प्रकरणादिभेदेन अनेकं भवति। यथा-**गतोऽस्तम् अर्कः** इत्यत्र सूर्यस्य अस्तगमनरूपं वाच्यम् एकमेव भवति, किन्तु व्यङ्ग्यं सन्ध्याविधि-अभिसारादिरूपेण अनेकविधं भवति। वाचस्य आश्रयः शब्द एव भवति, व्यङ्ग्स्य तु शब्दः, शब्दस्यैकदेशः, चेष्टादयश्च आश्रया भवन्ति। वाच्यज्ञानस्य कारणं कोश-व्याकरणादि भवति, व्यङ्ग्यज्ञानस्य तु प्रकरणादि प्रतिभाया निर्मलता चापि। वाच्यस्य ज्ञाता बोद्धा कथ्यते, व्यङ्ग्यस्य तु विदग्धः (सहृदयः)। वाच्यस्य कार्यं केवला प्रतीतिरेव भवति, व्यङ्ग्यस्य तु चमत्कारोऽपि। एवं कार्यभेदो भवति। वाच्यस्य विषयः (बोद्धा) अन्यो भवति, व्यङ्ग्यस्य तु अन्यः। यथा- **कस्य वा न भवति रोषः** इत्यादौ पद्ये वाच्यस्य विषयः सखी वर्तते, किन्तु व्यङ्ग्यस्य सख्याः कान्तः सपत्न्यादयो वा वर्तन्ते। वाच्यं पूर्वं ज्ञायते, व्यङ्ग्यं तु पशिचात्। एवं कालभेभोऽपि भवति। एवं वाच्य-व्यङ्ग्ययोः स्वरूपादिभिर्नाना भेदा भवन्ति। अतो वाच्ये व्यङ्ग्यस्य अन्तर्भावो न संभवति।

13. व्यञ्जनाया अभावे अनित्यत्वस्य नित्यत्वस्य च व्यवस्था कुत्र न सिद्ध्यति ?

14. 'अखण्डबुद्धिनिर्ग्राह्यो वाक्यार्थ एव वाच्यः, वाक्यमेव च वाचकम्' अस्य विवक्षितोऽ र्थः कः?

अत्र मम्मटो वैयाकरणस्य वेदान्तिनो वा मते व्यञ्जनाया अनिवार्यतां साधयति। वैयाकरणमते वाक्यं वाक्यार्थश्च अखण्डमेव भवतः। वाक्ये पदानि कल्पितानि एव सन्ति, एवं वाक्यार्थे पदार्था अपि कल्पिता एव सन्ति। वाक्यं वाक्यार्थश्च अखण्डयैव बुद्ध्या गृह्यते। यस्यां बुद्धौ वाक्ये वाक्यार्थे च क्रिया कारकाणि च भासन्ते सा खण्डा भवति, यस्यां तु न भासन्ते सा अखण्डा कथ्यते। अनया एव वाक्यार्थो गृह्यते। अखण्डस्य वाक्यार्थस्य वाचकम् अखण्डमेव वाक्यं भवति। एवं वाक्ये वाचकत्वम् (अभिधा) एव भवति, नात्र व्यञ्जनाया अवसरोऽ स्ति। किन्तु मम्मटो वदति यद् अखण्डतापक्षे व्यञ्जनाया अभावो यदि भवति तदा भवतु, किन्तु अविद्यादशायाम् (प्रक्रियादशायाम्) यदा पदानां पदार्थानां च कल्पना वैयाकरणैः क्रियते तदा तु व्यङ्ग्यस्य बोधनाय व्यञ्जना स्वीकार्या एव। एवं वेदान्तिनो वदन्ति यत् 'तत् त्वम् असि' इत्यखण्डेन वाक्येन अखण्ड एव जीव-ब्रह्मणोः अभेदरूपो वाक्यार्थो बोध्यते। ते वेदान्तिनोऽ पि अविद्यादशायां (व्यवहारदशायां) पदानां पदार्थानां च कल्पनां कुर्वन्ति एव। अतः तेषां मतेन परमार्थ-दशायां व्ञ्जना न भवति चेत्, न भवतु, किन्तु व्यवहार-दशायाम् उक्तरीत्या व्यञ्जनाया अनिवार्यता सिद्ध्यति एव।

15. व्यञ्जना अनुमाने कथं न अन्तर्भवति ? यथाग्रन्थं प्रतिपादयत।

महिमभट्टादयो वदन्ति यद् व्यञ्जनाया अन्तर्भावः अनुमाने एव भवति। व्यञ्जनया सोऽ र्थो बोधयितुं न शक्यते यो वाच्येन येन केनापि प्रकारेण संबद्धो न भवति। एवं वाच्येन अन्योऽ र्थः अनुमीयते एव, न तु व्यज्यते। यथा- भ्रम धार्मिक विश्वस्तः स शुनकोऽ द्य मारितस्तेन।
गोदावरीकच्छकुञ्जवासिना दृप्तसिंहेन।।

अत्र गोदावरीतटे सिंहरूपेण हेतुना भीरोर्धार्मिकस्य भ्रमणाऽ भावः अनुमीयते।

किन्तु मम्मटो वदति यत् सिंहोऽ त्र हेत्वाभासो वर्तते, न तु हेतुः। सिंहस्य भीरोः अभ्रमणेन नित्यः सम्बन्धो नास्ति, यतो भीरुरपि निधिलाभादीनां लोभेन सिंहे सत्यपि भ्रमति। अतः सिंहः अनैकान्तिकनामको हेत्वाभासो भवति। धार्मिकः कुक्कुराद् बिभेति, स तस्य स्पर्शाद् आत्मानं रक्षति, किन्तु यदा स वीरो भवति तदा सिहः तस्य भ्रमणस्य हेतुर्भवति। एवं सिहो भ्रमणाभावाद् विपरीतं भ्रमणम् एव साधयति। एवं साध्यविपरीतस्य साधकः सिंहो विरुद्धनामको हेत्वाभासो वर्तते। सिंहस्य सत्ता केनचिद् अपि प्रमाणेन सिद्धा नास्ति, अतः सिहोऽ सिद्धनामको हेत्वाभासो विद्यते। ईदृशाद् हेत्वाभासाद् गोदावरीतीरे भ्रमणाभावस्य अनुमानं न संभवति, किन्तु व्यञ्जना संभवति, सा हि हेत्वाभासाद् अपि भवति, हेत्वाभासोऽ पि व्यञ्जको भवति। यथा

'निःशेषच्युतचन्दनम्' इत्यादौ स्नानादपि संभविनः चन्दनच्यवनादयो दूत्या नायकसमीपे गमनं नायकेन रमणं च व्यञ्जनया बोधयन्ति।

एवं व्यञ्जनाया अन्तर्भावो न अभिधायाम्, न तात्पर्ये, न लक्षणायाम्, नापि अनुमाने चास्ति। अतः सा स्वीकार्या- इति मम्मटस्य अभिप्रायो वर्तते।

## षष्ठ उल्लासः

1. शब्दालंकारस्य अर्थालंकारस्य च विषये भामहस्य मतं प्रतिपादयत।

केचिद् वदन्ति यत् काव्ये रूपकादयः अर्थालंकारा एव प्रधानभूताः सन्ति। एभिर्विना कश्चिद् अपि अर्थो न विभाति (रस्य व्यञ्जको विभावो न भवति), यथा कस्याश्चिद् रमण्याः सुन्दरम् अपि अलंकाररहितं मुखम्। रूपकादीनां योगेनैव अर्थे रसाभिव्यञ्जनस्य सामर्थ्यं भवति। केचिद् वदन्ति यत् शब्दालंकार एव प्रधानं वर्तते, रूपकादयोऽ लंकारा बाह्याः सन्ति। शब्दालंकार-जन्येन चमत्कारेण चमत्कृते चेतसि पश्चाद् उपस्थिता अर्थालंकारास्तथा चमत्कृतिं न उत्पादयन्ति। सुबन्तानां तिङ्ङन्तानां पदानां व्युत्पत्तिः (विशेषरूपेण चमत्कृतिजनकत्वेन संनिवेशः) अलंकारो वर्तते। एषैव सौशब्द्यं (शोभनानां शब्दानां भावः) उच्यते। किन्तु भामह उभयम् अपि मतं खण्डयित्वा शब्दालंकारम् अर्थालंकारं च समानरूपेण स्वीकरोति।

2. शब्दचित्रे अर्थचित्रं संभवति वा न वा ?
3. सौशब्द्यं किम्?
4. शब्दचित्रम् उदाहरत।

चित्रकाव्यं द्विधा भवति- शब्दचित्रम् अर्थचित्रं च। अत्र चित्रशब्देन **गुणालंकारयुक्तम्** इति प्रथमे उल्लासे प्रतिपादितम्। चित्रं काव्यम् अव्यङ्ग्यं कथ्यते। अत्र किमपि व्यङ्ग्यं यद्यपि भवति तथापि तत्र कवेः तात्पर्यस्य अभावेन इदम् अव्यङ्ग्यं कथ्यते। तत्र शब्दचित्रे शब्दालंकारस्य प्रधानता भवति। यथा-

प्रथममरुणच्छायस्तावत्ततः कनकप्रभः
तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
उदयति ततो ध्वान्तक्षोदक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः।।

अत्रच्छकार-तकाराणाम् आवृत्त्या अनुप्रासः शब्दालंकारः प्रधानं वर्तते। कविना प्रयत्नपूर्वकं स एवात्र निबद्धः। चन्द्र-स्वभावस्य वर्णनेन स्वभावोक्तिः, चन्द्रस्य विरहिण्याः कपोलेन सादृश्यस्य वर्णनाद् उपमा च अर्थालंकारौ यद्यपि स्तः, एवं चन्द्रोदयरूपस्य विभावस्य वर्णनेन यद्यपि शृङ्गारश्च प्रतीयते तथापि

तत्र कवेस्तात्पर्यं नास्ति। अतोऽ र्थालंकारयोः शृङ्गाररस्य च प्रधानता नास्ति। ओजोगुणस्य व्यञ्जका वर्णा तथा दीर्घः समासश्चास्ति। अतः **चित्रम्** इति नाम सार्थकं विद्यते।

5. अर्थचित्रम् उदाहरत।

चित्रकाव्यं द्विधा भवति- शब्दचित्रम् अर्थचित्रं च। अत्र चित्रशब्देन **गुणालंकारयुक्तम्** इति प्रथमे उल्लासे प्रतिपादितम्। चित्रं काव्यम् अव्यङ्ग्यं कथ्यते। अत्र किमपि व्यङ्ग्यं यद्यपि भवति तथापि तत्र कवेः तात्पर्यस्य अभावेन इदम् अव्यङ्ग्यं कथ्यते। तत्र शब्दचित्रे अर्थालंकारस्य प्रधानता भवति। यथा-

ये दृष्टिमात्रपतिता अपि कस्य नात्र
क्षोभाय पक्ष्मलदृशामलकाः खलाश्च।
नीचाः सदैव सविलासमलीकलग्ना
ये कालतां कुटिलतामिव न त्यजन्ति।।

अस्य पद्यस्य भावो वर्तते यद् यासां नायिकानां नेत्रयो रोमाणि घनानि भवन्ति तासाम् अलकाः (कुटिलाः केशाः) खलाः (दुर्जनाश्च) दर्शनमात्रेण सर्वेषां हृदये क्षोभं जनयन्ति, सदा नीचाः (केशा अधोमुखाः, खलाश्च अधमा) भवन्ति, अलीके (केशा ललाटे, खलाश्च मिथ्यावचने) लग्ना भवन्ति, कालताम् (केशपक्षे कृष्णवर्णताम्, खलपक्षे यमरूपतां) इव कुटिलतां (केशपक्षे वक्रताम्, खलपक्षे वक्रस्वभावं) न त्यजन्ति च। अत्र पद्ये क्षोभरूपे एकस्मिन् कार्ये प्रकृतानां खलानाम् अप्रकृतानाम् अलकानां च अन्वयस्य वर्णनेन दीपकरूपः अर्थालंकारः प्रधानं वर्तते। अन्येषां मतेनाऽ त्र खलैरेव क्षोभरूपे कार्ये सिद्धे अलकानाम् अपि तत्साधकत्वेन वर्णनात् समुच्चयरूपः अर्थालंकारः प्रधानं विद्यते। 'कालतां कुटिलताम्' इत्यादौ अनुप्रासः, श्लेषश्च सन्नपि प्रधानं नास्ति, कवेः तात्पर्यं हि दीपके समुच्चये वाऽ र्थालंकारे एवास्ति। अतः काव्यमिदम् अर्थचित्रम् अस्ति।

6. चित्रकाव्यम् अव्यङ्ग्यं कथं कथ्यते?